# Sragdharapanchaka Stotram

# स्रग्धरापञ्चकस्तोत्रम्

## Document Information

Text title : Sragdharapanchaka Stotram

File name : sragdharApanchakastotram.itx

Category : misc, buddha, panchaka, stotra

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# स्रग्धरापञ्चकस्तोत्रम्

वन्देऽहं तत्त्वरूपं ततविततभवं भव्यहव्यस्वभावं
बुद्धानामादिबुद्धं कृतविविधहितं तेजसां सन्निधानम् ।
सम्यक्सम्बोधिमूर्तिं त्रिगुणविलसितं पञ्चज्ञानैकहेतुं
नैराकारं निरञ्जं गगनवदनिशं निर्मलं चित्तचैत्यम् ॥ १॥

ज्योतीरूपे त्वदीये विनिलयतपसा दानशीलक्षमासु
वीर्यध्यानाख्यप्रज्ञोदधिकृततरणो माणिवृन्दे सुजातौ ।
बोधिं प्राप्तोऽस्मि चास्मिन् सकलपूरवरे चाकनिष्ठे महिम्नि
वन्दे त्वां विश्वरूपं स्फटिकमणिरिवोपात्तनानाप्रभेदम् ॥ २॥

नाना वैध्यं सुपूज्योपकरणमनिशं ढौकितं सर्वलोकैः
किं चाहं ढौकयिष्ये त्वदनुनयमनास्त्यक्तराज्यादिद्रव्यः ।
जातौ जातौ च जातौ कृतसुकृतचयं कायवाङ्मानसैस्तै-
स्तत्सर्वं ढौकयिष्ये निजतनुसहितं सङ्गृहाण सुबुद्धे ॥ ३॥

एकं युग्मं तृतीयं युगलयुगमथो पञ्चमं षष्ठसंज्ञं
सप्ताष्टौ वै नवाख्यं दशममथ तथैकादशं द्वादशाख्यम् ।
त्रायोदश्यं चतुर्दश्यमथ शरकमठं चैकतः संप्रसूतं
आनन्त्यं स्वं तदेवं जगदखिलमभूत् त्वां नमे चैकरूपम् ॥ ४॥

एको वैरोचनाख्यस्तदपरजिनो बुद्ध अक्षोभ्यसंज्ञः
रत्नाद्यः सम्भवोऽसौ त्रितय अमृतरुक्संज्ञकस्तुर्यसञ्ज्ञः ।
पञ्चाख्योऽमोघसिद्धिस्तदनु च जगति ख्यातसञ्ज्ञाद्यसञ्ज्ञा
देवा दैत्याश्च मर्त्या भवदवयवजाः सर्वदाऽहं नतोऽस्मि ॥ ५॥

इति श्रीशाक्यसिंहबुद्धकृतं स्रग्धरापञ्चकं सम्पूर्णम् ॥

*Sragdharapanchaka Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*